# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ८** | गुणाः - ७० |
| विषयः – सर्वदर्शनम् | **कोड – CE-2.3.6** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – ०२/१२/२०१६ | सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली (आदितः पृथिवीनिरूपणान्ता) | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयम् उत्तरयत।** ०८

(१) "सामान्यं द्विविधं.............परतयोच्यते" इति कारिकां यथाग्रन्थं विवेचयत।

(२) "उत्क्षेपणं ततो............पञ्च च" इति कारिकां यथाग्रन्थं विस्तारयत।

(३) ईश्वरास्तित्वे प्रमाणं, मीमांसकमतखण्डनपुरस्सरं स्पष्टयत।

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) न्यायसिद्धान्तमुक्तावल्याः मङ्गलवादं वितनुत

(२) जातिबाधकसङ्ग्रहविषये यथामुक्तावलि एकं निबन्धं लिखत।

**प्रश्नः – ३ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) नव द्रव्याणि। (३) समवायः।

(२) अभावः। (४) विशेषाः।

**प्रश्नः – ४ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) न्यायसिद्धान्तमुक्तावल्याः कर्ता कः? (५) भावपदार्थाः कति?

(२) सामान्यं कतिविधम्? (६) गोपवधूटीदुकूलचौरः कः?

(३) संसारमहीरुहस्य बीजं किम्? (७) किं नाम सामान्यम्?

(४) गुणाः कतिविधाः?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयम् उत्तरयत।** ०८

(१) "अन्यथासिद्धि............परिकीर्तितम्" इति कारिकां विवेचयत।

(२) "यत्समवेतं...............तृतीयं स्यात्' इति कारिकां यथाग्रन्थं स्पष्टयत।

(३) मीमांसोक्ततमसः दशमद्रव्यत्वं प्रतिपाद्य तस्य निराकरणं कुरुत।

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य उत्तरं लिखत।** ०८

(१) सप्तपदार्थानां साधर्म्यं निरूपयत।

(२) त्रिविधकारणस्य यथाग्रन्थं विवेचनं लिखत

**प्रश्नः – ७ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) पञ्चान्यथासिद्धयः। (३) भूतत्वम्।

(२) अभावचतुष्टयम् (४) मूर्तत्वम्।

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत।** ०५

(१) किं नाम साधर्म्यम् ?
(२) किं नाम वैधर्म्यम् ?
(३) किं नाम पारिमाण्डल्यम् ?
(४) पटस्य समवायिकारणं किम् ?
(५) किं नाम निमित्तकारणम् ?
(६) न्यायनये कति प्रमाणानि स्वीक्रियन्ते ?
(७) लक्षणस्य लक्षणं किम्?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयम् उत्तरयत।** ०८

(१) नवद्रव्याणां साधर्म्यं यथाग्रन्थं निरूपयत
(२) क्षित्यादिचतुष्टयमनसः साधर्म्यं यथाग्रन्थं विवृणुत।
(३) पृथिवीत्वसिद्धिं यथाग्रन्थं साधयत

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य उत्तरं लिखत।** ०८

(१) पृथिव्याः त्रैविध्यं निरूपयत।
(२) पृथिवीलक्षणं विलिख्य यथाग्रन्थं लक्षणसमन्वयं प्रदर्शयत

**प्रश्नः – ११ निम्नलिखितयोः कस्यचिद् एकस्य उपरि लघुटिप्पणीं लिख्यताम्** ०२

(१) नित्यद्रव्याणि।
(२) अव्याप्यवृत्तिः।

**प्रश्नः – १२ अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः अतिलघूत्तरं यच्छत।** ०२

(१) अपेक्षाबुद्धिः कतिक्षणपर्यन्तं तिष्ठति?
(२) ज्ञानादिकं कतिक्षणावस्थायि ?
(३) पृथिव्यप्तेजोवायुषु चतुर्षु किं साधर्म्यम्?
(४) स्पर्शवत्त्वं केषु द्रव्येषु भवति?

***

# Answer Key

कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम् – ८** गुणाः - ७०

विषयः – सर्वदर्शनम् **कोड – CE-2.3.6** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – ०२/१२/२०१६ सन्दर्भग्रन्थः – न्यायसिद्धान्तमुक्तावली (आदितः पृथिवीनिरूपणान्ता)

## प्रथमान्वितिः (Unit-1)

**प्रश्नः – १**

**प्रश्नः – २**

**प्रश्नः – ३** १.

**प्रश्नः – ४** १. विश्वनाथपञ्चाननः

२. द्विविधम्

३. परमात्मा

४. चतुर्विंशतिविधाः

५. षट्

६. कृष्णः

७. नित्यत्वे सत्यनेकसमवेतत्वम् ।

## द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ५**

**प्रश्नः – ६**

**प्रश्नः – ७** १.

**प्रश्नः – ८** १. समानो धर्मो येषां ते सधर्माणः, तेषां भावः साधर्म्यम् ।

२. विरुद्धो धर्मो येषां ते विधर्माणः, तेषां भावः वैधर्म्यम् ।

३. अणुपरिमाणम्

४. तन्तवः

५. समवायि-असमवायिकारणभिन्नकारणम्

६. चत्वारि

७. असाधारणधर्मवत्त्वम्

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९**

**प्रश्नः – १०**

**प्रश्नः – ११** १.

**प्रश्नः – १२** १. क्षणत्रयम्

२. क्षणद्वयावस्थायि

३. द्रव्यारम्भकत्वम्

४. पृथिव्यप्तेजोवायुषु